Downloaded From : http://cbseportal.com/

This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. / अनुक्रमाङ्कः | | | | | | | | | | | | |

Code No. 59/SS/O
गूढसंख्या

Set / स्तबकः **A**

# VEDA ADHYAYAN
# वेदाध्ययनम्
# (345)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 59/SS/O-A नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (345)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10**, **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) ऋग्वेदे कति ऋचः सन्ति ।

(क) 10472 (ख) 10550

(ग) 11330 (घ) एकमपि न

(2) ज्ञानाग्नेः प्रज्वलनं भवति ।

(क) कर्मणा (ख) मेधया

(ग) श्रद्धया (घ) विनयेन

(3) साम इत्यस्य सा नाम किम् ।

(क) ऋक् (ख) साम

(ग) यजुः (घ) अथर्वः

(4) मौदशाखा कस्य वेदस्य ।

(क) ऋग्वेदस्य (ख) सामवेदस्य

(ग) यजुर्वेदस्य (घ) अथर्ववेदस्य

(5) दाशुषे इत्यस्यार्थः को भवति ।

(क) हविर्दत्तवते (ख) धनदत्तवते

(ग) रत्नदत्तवते (घ) स्वर्णदत्तवते



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

(6) पुरुषस्य मनसः कः जातः ।

(क) सुर्यः (ख) अग्निः

(ग) वायुः (घ) चन्द्रमा

(7) असंबाधं ___________ मानवानाम् ।

(क) मध्यतो (ख) बृहतो

(ग) पार्श्वतो (घ) पृष्ठतो

(8) पणयः के भवन्ति ।

(क) दानवाः (ख) असुराः

(ग) मानवाः (घ) पशवः

(9) समासस्य इति कीदृशं सूत्रं भवति ।

(क) विधिसूत्रम् (ख) परिभाषासूत्रम्

(ग) संज्ञासूत्रम् (घ) अधिकारसूत्रम्

(10) के गतिसंज्ञका उच्यन्ते ।

(क) निपाताः (ख) स्वराः

(ग) वर्णाः (घ) उपसर्गाः

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) ऋग्वेदसंहितायाः कति विभागाः, के च ते ?

(2) कृष्णयजुर्वेदस्य कति शाखाः ? तासां नामानि लिखत ।

(3) विनियोगो नाम किम् ? स नः पवस्व शंगवे इत्यस्य मन्त्रस्य प्रयोगः कदा भवति ?

(4) ब्राह्मणः कदा अग्न्याधानं करोति ? वैश्यस्य अग्न्याधानं कदा भवति ?

(5) हिरण्यगर्भसूक्तस्य कः ऋषिः ? का देवता ?

(6) आष्टमिकमामन्त्रितसूत्रं किं ज्ञापयति ? उदाहरणं किम् ?

(7) ईले इत्यत्र अनुदात्तं पदमेकवर्जम् इति सूत्रं कथं न प्रवर्तते ?

(8) संज्ञायामुपमानम् इति सूत्रस्य अर्थमुदाहरणं च लिखत ।

(9) वयस्यर्थे ज्येष्ठकनिष्ठयोः कः स्वरो विधीयते ?

(10) देवताद्वन्द्वे च इति सूत्रं कीदृशम् ? उदाहरणं किम् ?



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) संवादसुक्तं नाम किम् ? उदाहरणपूर्वकं व्याख्यायताम् ।

(2) व्याकरणाध्ययनस्य कानि प्रयोजनानि ?

(3) काचिदेका टीका लेख्या – केनोपनिषद्, छान्दोग्योपनिषद् ।

(4) इन्द्रस्य वीर्यवर्णनं मन्त्रोल्लेखपूर्वकं कुरुत ।

(5) पर्जन्यसूक्तसारम् **अथवा** पर्जन्यदेवतास्वरूपम् सूक्तानुसारि प्रतिपादयत ।

(6) मनसैवानुद्रष्टव्यम् – इत्यस्य सूक्तानुसारं तात्पर्य्यं प्रतिपाद्यताम् ।

(7) स्वरितस्य विधायकं सूत्रं लिखित्वा तस्य व्याख्यानं कुरुत ।

(8) निपातस्वरविधायकं सूत्रं सोदाहरणं व्याख्यात ।

(9) अनुदात्तौ सुप्पितौ इति सूत्रं सोदाहरणं व्याख्यात ।

(10) तत्पुरुषस्य प्रकृतिस्वरः कदा विधीयते ? सूत्रं प्रत्येकमुदाहरणं च दीयताम् ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) सामगानं तद्विभागान् च वैशद्येन विवृणुत ।

(2) अ॒ग्निर्होता॑ क॒विक्र॑तुः इत्यस्य मन्त्रस्य पदपाठं स्वरसाधनं च कुरुत ।

(3) पुरुषस्वरूपं वर्णयत **अथवा** पुरुषसूक्तस्य सारांशं संक्षेपेण लिखत ।

(4) षाष्ठिकामन्त्रितसूत्रस्य सोदाहरणं विश्लेषणं कुरुत ।

(5) अभ्यस्तधातुनां स्वरविधायकं सूत्रं सोदाहरणं व्याख्यात ।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS